National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(59): 167-171
© 2025 NJHSR
www.sanskritarticle.com

**Dr. Mou Goswami**
Assistant professor,
Dept. of Education,
Shri Sadashiva Campus, Puri

**Correspondence:**
**Dr. Mou Goswami**
Assistant professor,
Dept. of Education,
Shri Sadashiva Campus, Puri

# अध्यापकशिक्षाया: गुणवत्तासंवर्धनाय राष्ट्रियशिक्षानीतेः (2020) भूमिका

**Dr. Mou Goswami**

**उपोद्घात**: शिक्षा मानवजीवनस्य सर्वेषु क्षेत्रेषु अपेक्षितज्ञानबोधव्यवहारान् विकासयति । शिक्षाया: मुख्योद्देश्यं वर्त्तते बालकस्य सर्वांगीणविकास:। अर्थात्शिक्षक: प्रत्येकं बालकस्य शारीरिक-मानसिक-बौद्धिक-नैतिक-सामाजिक-सांवेगिक विकासाय प्रयत्नं कुर्यात्। एकः शैक्षिकसंस्था स्वछात्रान् अज्ञानस्य अन्धकारात् ज्ञानप्रकाशं प्रति नेतुम् शिक्षणस्य अनुभवं प्रदातुं महत्त्वपूर्णं कार्यं करोति। संस्थासु ये प्रमुखाः कर्मचारिणः एतत् परिवर्तनं आनेतुं महत्त्वपूर्णां भूमिकां निर्वहन्ति ते शिक्षकाः सन्ति। यथा एनसीटीई द्वारा माध्यमिक-अध्यापकशिक्षा विषये उक्तं यत्, "कस्मिन् अपि शैक्षिककार्यक्रमे शिक्षकः एव महत्त्वपूर्णं तत्त्वंभवति। कस्मिन् अपि चरणे शैक्षिकप्रक्रियायाः कार्यान्वयनस्य मुख्यतया उत्तरदायी शिक्षकः एव भवति"। अध्यापनं विश्वस्य प्राचीनतमेषु सम्माननीयेषु च व्यवसायेषु अन्यतमम् अस्ति । शिक्षकाणां भूमिका, कार्याणि, योग्यता, सज्जता च समये समये परिवर्तनं जातम् शिक्षकानाम् आवश्यकता सर्वदा अत्यावश्यकी भवति। परिवर्तनशीलकालः तथा च समाजस्य आवश्यकताः शिक्षकसज्जतायाः मार्गेषु परिवर्तनस्य आवश्यकतां जनयन्ति। एतेन ज्ञायते यत् शिक्षकाणां सज्जतायां निवेशः अत्यावश्यकः यथा राष्ट्रस्य भविष्यं सुरक्षितं भवति। बहुविषयकदृष्टिकोणस्य ज्ञानस्य च आवश्यकतां जनयति इति क्रियाकलापस्य शिक्षकस्य सज्जता, स्वभावानां मूल्यानां च निर्माणं तथा च उत्तममार्गदर्शकानां अधीनं अभ्यासस्य विकासः।

भारतस्य राष्ट्रियशैक्षिकनीतिः २०२० देशस्य एकविंशतितमशताब्द्याः प्रथमा शिक्षानीतिः अस्ति, अस्माकं देशस्य अनेकाः वर्धमानाः विकासस्य अनिवार्यताः सम्बोधयितुं तस्याः उद्देश्यं वर्तते। नूतना शिक्षानीतिः अध्यापकशिक्षायाः उपरि बलं ददाति। नवीनशिक्षानीतिः आचार्यदेवभवस्य भावनायाः प्रशंसन्त्याः अध्यापकशिक्षायाः आलोचनात्मकतायाः विषये दृढतया बलं ददाति। शिक्षाव्यवस्थायाः सर्वेषां चरणानां माध्यमेन सेतुं निर्मातुं अध्यापकशिक्षा महत्त्वपूर्णा अस्ति या अग्रिमपीढीं प्रति आकारं दास्यति। राष्ट्रीयशिक्षानीतिः २०२० भारते शिक्षाव्यवस्थायां मौलिकपरिवर्तनस्य केन्द्रे शिक्षकं स्थापयितुं महत्वं ददाति। शिक्षकाणां कृते राष्ट्रियव्यावसायिकमानकानि अध्यापकशिक्षायाः गुणवत्तां सुनिश्चित्य निर्मिताः सन्ति तथा च एनईपी २०२० इत्यस्य लक्ष्यं सर्वेषां अधिगन्तॄणाम् कृते उच्चतमगुणवत्तायुक्तशिक्षायाः समानरूपेण आवंटनं कर्तुं निर्धारिताः सन्ति।

**अध्यापकशिक्षा**

जगति अध्यापनमेका अतिप्राक्तनी गौरवोपेता च वृत्तिः । यदा एकस्यां रीतौ समाजः व्यवस्थीकृतः तदैव समाजभाविसभ्यानां बालानां भविष्यविषये अवधानं प्रदर्शनीयमापतितम्। यदौपचारिकाभिकरणैः विद्यालयैः पूर्यमाणमस्ति। तदर्थमेव बहूनामध्यापकानामावश्यकता जाता। एतेषाम् अध्यापकानां प्रशिक्षणमप्यावश्यकं जातम्। अनेनैव कारणेन अध्यापकशिक्षासंस्थाः स्थापिताः।

अध्यापकशिक्षा नीतयः, प्रक्रियाः इत्यादीनां समुच्चयः अस्ति, ये शिक्षकानां ज्ञानं, मनोवृत्तिः, व्यवहारः, शिक्षणकौशलं च संशोधयितुम् निर्मिताः सन्ति।

अध्यापकशिक्षायां ते सर्वे अनुभवाः औपचारिकाः, अनौपचारिकाः च क्रियाकलापाः सन्ति ये कस्यापि व्यक्तेः शिक्षणव्यवसायस्य उत्तरदायित्वं निर्वहनस्य, क्षमता प्रददाति।

**प्राचीनभारते अध्यापकशिक्षाव्यवस्था**

- प्राचीनकाले वैयक्तिकशिक्षणम् (Individual teaching) आसीत्। तथापि तदा तदा केषुचन आश्रमेषु, केषाञ्चित् प्रसिद्धगुरूणां सकाशे शिष्याः पञ्चदशवर्षपर्यन्तमपि अधीयन्ते स्म। इयं व्यवस्था प्रारम्भवैदिककाले आसीत्। ब्राह्मणकाले शिष्याणां संख्या प्रवृद्धा। बौद्धकाले सामूहिकिशिक्षा सामान्या अभवत् । एवमेकस्यैव गुरोः सकाशे अधीयानानां छात्रेषु केषाञ्चित् कुशाग्रबुद्धीनां छात्राणां साहाय्येन गुरुः यदा प्रवासं गच्छति, तदा अध्यापनकार्य निर्वहति स्म । एतादृशा एव निजगुरोः सान्निध्ये इतरेषां सहपाठिनां बोधनशीलाः कालान्तरे गुरवः भवन्ति स्म। एवं यद्यपि औपचारिकरूपेण अध्यापकशिक्षाव्यवस्था नासीत् तथापि अनौपचारिकरूपेण एतादृशी व्यवस्थासीदिति अवगन्तुं शक्यते। अस्या एव पद्धतेः कक्ष्यानायकीयपद्धतिरिति नाम।
- भारतदेशस्योपरि पाश्चात्यानामाक्रमणानन्तरमत्र नूतनशिक्षायाः आरम्भः जातः। सा तत्पूर्ववर्तिन्याः भारतीयशिक्षायाः सर्वथा भिन्ना। 'इङ्गिलश् ईस्ट् इन्डिया' नामकसंस्था वाणिज्यव्याजेन भारतदेशे प्रविश्य पश्चात् स्वकीयां राजनैतिकशक्तिमत्र सुदृढं संस्थाप्य अस्माकमान्तरङ्गिकविषयेषु सर्वेष्वपि हस्तक्षेपं कृत्वा अस्माकं देशस्य स्वरूपमेव अन्यथाकरोत्। एते ऐदम्प्राथम्येन विद्यालयान् संस्थाप्य तदनु अध्यापकशिक्षासंस्थाः प्रारब्धवन्तः ।
- पाश्चात्यानामागमनात् प्रागेव कक्ष्यानायकीयपद्धतिः (Monitorial System) नाम्ना एकमध्यापकानां प्रशिक्षणविधानमासीदेव। वुड् महाशयः स्वीयं घोषणापत्रं 1854 वर्षे प्रकटयामास। एतद्घोषणा-पत्रमाङ्ग्लशिक्षाविषये भारतदेशे अतिमुख्यं प्रमाणपत्रमिति विद्वद्भिः समसूचि। अध्यापकशिक्षाविषये नैकानि परिवर्तनानि सूचितानि घोषणापत्रे। एवञ्च भारतदेशे बहुत्र अध्यापक-शिक्षासंस्थानां स्थापना करणीया इत्यपि असूचयत् ।
- 1854 तमे वर्षे वुड् महाधिकारपत्रद्वारा कम्पनी संचालकैः सूचितं, यत् भारते इंग्लण्ड् देशीयपद्धत्यनुसारं प्रत्येकस्मिन् प्रान्ते शीघ्रातिशीघ्रं प्रशिक्षणविद्यालयाः स्थापिताः भवेयुरिति। अध्यापकेभ्य वेतनवर्धनेन छात्राणां छात्रवृत्यादि सौकर्यकल्पनेन च शिक्षकप्रशिक्षणविषये शिक्षकाणां, छात्राणां च अवधानमा-कर्षणीयमिति सूचितमासीत् ।
- 1859 तमे प्रकाशितस्य स्टैनले-घोषणापत्रे एवमुक्तं यत् इङ्ग्लेण्ड-देशात् अध्यापकानामानयनं सर्वथा न समीचीनम्। एवं देशीया अध्यापका एव स्वीकरणीया इति तस्य मुख्याशयः।
- 1862 तमे वर्षे नार्मल्विद्यालयविधिद्वारा प्रचालिताः प्रशिक्षणालयाः स्थापिताः।
- प्रत्येकं छात्राध्यापकं प्रतिमासं पञ्चरूप्यकाणि छात्रवृत्तित्वेन दत्तानि। किन्तु पर्याप्तधनाभावात् 1871 यावत् केवलं २६ प्रशिक्षणालया एव आसन् । 1874 वर्षे बेंगाल् प्रान्तस्य राज्यपालस्य कैम्प् बेल् महोदयस्य योजनानुसारं 46 नार्मल प्रशिक्षणालयानामारम्भः जातः। 1882 वर्षे मुम्बई नगरे स्त्रीभ्यः द्वौ, पुरुषेभ्यः सप्तप्रशिक्षणविद्यालयाः स्थापिताः। मध्यप्रदेशेऽपि स्त्रीभ्यः एकः, पुरुषेभ्यः त्रयः प्रशिक्षणविद्यालयाः स्थापिताः।
- 1859 तः 1882 पर्यन्तं स्टेन्लेमहोदयस्य आदेशपत्रानुसारं भारतदेशे प्राथमिकशिक्षायै कतिचन प्रशिक्षणकेन्द्राणि स्थापितानि।
- 1904 तमे संवत्सरे भारतसर्वकारेण शिक्षानीतिः उद्घष्टा। तस्यां नीतौ 'यदि माध्यमिकशिक्षा अभिवर्धनीया तर्हि अध्यापकेभ्यः अध्यापनकलायां प्रशिक्षणं प्रदेयमिति' प्रतिपादितम्। पुनश्च हण्टर्-आयोगं समर्थ्य केचन सामान्यनियमा अपि प्रशिक्षणसंस्था-नामभिवर्धनविषये संसूचिताः। अध्यापकप्रशिक्षणकार्यक्रमार्थं प्रशिक्षणमहाविद्यालयाः एवं प्रशिक्षणविद्यालयाश्च आवश्यका इति नीतेः प्रगाढः अभिप्रायः आसीत् ।
- 1912 वर्षे सर्वकारीयप्रस्तावे अपि अध्यापकशिक्षाया महत्त्वं प्रदर्शितम्। एतदपि सूचितं यत् शिक्षाया आधुनिकव्यवस्थायां कस्यापि अध्यापकस्य तावत् पर्यन्तम् अध्यापनकार्ये नियुक्तिः न स्यात् यावत्पर्यन्तं तत्सम्बद्धप्रमाणपत्रं सः नार्जयति। 1913 तमे वर्षे शिक्षानीतिविषये भारतसर्वकारेण द्वितीयः प्रस्तावः प्रकटितः। अस्मिन् अध्यापकशिक्षाविषये परिदृश्यमानाः लोपाः प्रकटीकृताः। एवं तेषां दूरीकरणार्थं केचन उपायाश्च संसूचिताः ।
- **विश्वविद्यालयशिक्षायोगः (1949)** विश्वविद्यालयशिक्षायोगेन अध्यापकशिक्षायाः आवश्यकता एतेषु शब्देषु स्पष्टीकृता 'अयं खलु सर्वथासाधारणचिन्तनीयविषयः यत् विद्यालयस्य अध्यापकः यः आपञ्चविंशतिवर्षपर्यन्तं यत्किमप्यधिगच्छति तस्यैवाधारेण अध्यापनं करोति, स्वानुभवमतिरिच्य किमपि नवीनं ज्ञानं नैव प्राप्तुं शक्नोति' इति। एतदर्थं शिक्षकाय नवीनज्ञानं समये समये प्रदेयं तदैव सः स्वव्यवसायं समीचीनतया कर्त्तव्यनिर्वहणं कर्तुमर्हति।
- **माध्यमिकशिक्षायोगः (1953)** माध्यमिकशिक्षायोगेन अध्यापक-शिक्षाया विषये विशेषं महत्त्वं दत्त्वा अस्याः आवश्यकतायाः विषये स्वीयपरामर्शान् निम्नेषु शब्देषु प्रकटीकृतम्। अध्यापकप्रशिक्षण-संस्थाः कियन्त्यपि श्रेष्ठतमानि नियोजनानि कुर्वन्तु, अथापि ताः श्रेष्ठतमाध्यापकानां निर्माणे अक्षमाः सन्ति। ताः केवलमध्यापकेषु, तेषामेव गुणानां कौशलानामभिवृत्तीनां च समावेशं कर्तुं शक्नुवन्ति

- येन ते स्वकार्याणां सञ्चालनं सामान्यरुपेण विश्वासेन च कर्तुं समर्थाः भवन्ति।

**राष्ट्रियशिक्षानीतौ अध्यापकशिक्षा**

राष्ट्रियशिक्षानीतिः अध्यापकसमुदाये विश्वासं कृतवती। अध्यापकानां शिक्षा, तेषां कार्यकरणनियमेषु च परिष्कारमकरोत्। कर्तव्यनिष्ठता-विषयेऽपि प्राधान्यमदात्। राष्ट्रियशिक्षानीतेः कार्यान्वियनयोजनायां अध्यापकशिक्षायाः पर्याप्तोन्नत्यै अध्यापकस्य प्रभावि उत्तरदायित्वेन सह अध्यापकस्य स्थितौ परिष्कारमानेतुं नैके उपायाः संसूचिताः। एतेषु प्रमुखाः निम्नलिखिताः सन्ति।

- अध्यापकानां चयनपद्धतौ परिष्कारः।
- अध्यापकानां सेवानियमेषु च संशोधनम्।
- दोषनिवारणार्थमेकस्य सफलकार्यतन्त्रस्य निर्माणम्।
- शिक्षाया आयोजने प्रबन्धे च अध्यापकानां संयोजनम्।
- अध्यापकानां गौरवं तेषां व्यावसायिकसत्यनिष्ठतायाः परिरक्षणे व्यावसायिकदोषाणां च निवारणार्थम् अध्यापकसङ्घानां मेलनम्।
- अध्यापकेभ्य एकस्याः व्यावसायिकनीतिसंहितायाः निर्माणम्।
- शिक्षकशिक्षायाः गुणवत्तां निर्वाहयितुम् नूतनराष्ट्रीयक्षेत्रे पदानि गृहीताः सन्ति
  शैक्षिकसंस्थानां आधारभूतसंरचनासुधारार्थं शिक्षानीतिः।
- अध्यापकेषु नवीनतायाः स्वायत्ततानां च उन्नत्यै आवश्यक-वातावरणस्य अवसराणां, कार्यान्वियनयोजनायाः सञ्चालनाय दृढनिश्चयः। कार्यक्रमस्य कार्यान्वियाय पर्याप्तमात्रायां वित्तीय-संसाधनानां च आवश्यकतास्ति।

**नवशिक्षानीति 2020 अध्यापकशिक्षा च**

**अध्यापकशिक्षायाः गुणवत्तासंवर्धने प्रस्ताविताः परामर्शाः**

- भविष्यनिर्मतृणां शिक्षकाणां समूहस्य निर्माणे अध्यापकशिक्षायाः भूमिका अधिकमहत्त्वपूर्णा। शिक्षकाणां निर्माणम् एतादृशी प्रक्रिया वर्तते तत्र बहुविषयकदृष्ट्या ज्ञानेन च सह उत्तमप्रशिक्षकाणां निर्देशने मान्यतामूल्येनिर्माणेन सह अभ्यासस्यापि आवश्यकता विद्यते। शिक्षकाः शिक्षणप्रक्रियया शिक्षणशास्त्रस्य प्रगत्या च सह भारतीयमौल्यानि, भाषाः, ज्ञानम्, लोकाचारम्, जनजातीय-पम्पराज्ञानेन सह परम्परां च प्रति जागरूकाः स्युः।
- सर्वोच्चन्यायालयेन आरचितस्य जे. एस्. वर्माआयोगस्य (2012) अनुगुणं दशसहस्राधिकसंख्याकाः स्वतन्त्र-टीईआई अध्यापकशिक्षां प्रति लेशमात्रमपि गम्भीरप्रयासं न कुर्वन्तः सन्ति किन्तु आधिक्येन उपाधेः विक्रयणं कुर्वन्तः सन्ति। अद्यावधि कृतः प्रयासः नहि व्यवस्थायां विद्यमानभ्रष्टाचारम् अवरोधुं क्षमाः, न वा गुणवत्तायाः कृते निर्दिष्टमूलभूतमानकस्य संयोजने। अनेन प्रयासेन अस्मिन् क्षेत्रे गुणवत्तायां नवाचारे च नकारत्मकप्रभावः समापतितः। अतः अस्य क्षेत्रस्य तन्नियमप्रणाल्यां महत्तपूर्णप्रवत्या पुनरुद्धारस्य तात्कालिकी अपेक्षा विद्यते येन गुणवत्तायाः उच्चमानकस्य निर्धारणा स्यात् एवं शिक्षकशिक्षाव्यवस्थायाम् अखण्डतायाः विश्वसार्हतायाः प्रभावपूर्णायाः गुणवत्तायाः च प्रतिष्ठापनं स्यात्।
- शिक्षणवृत्तेः प्रतिष्ठां पुनःस्थापयितुम् समग्रतायाः विश्वासार्हतायाः च स्तरस्य अभिवृद्धये प्रापणार्थं च तेन माध्यमेन उत्तमविद्यालयप्रणाल्याः निश्चयार्थं मूलभूतशैक्षिकमापदण्डं पूरयितुम् असमर्थानाम् अयोग्यानाम् अध्यापकशिक्षासंस्थानाम् (टीईआई) विरुद्धम् नियमोल्लङ्घनार्थम् एकवर्षप्रदानेन सह ततः परं कठोरक्रमं कर्तुम् अधिकारो भवति। तेन 2030 यावत् केवलं शैक्षिकरूपेण सुदृढः बहुविषयिकः एकीकृताध्यपकशिक्षाकार्यक्रमः एवं कार्यं करोति।
- अध्यापकशिक्षार्थं बहुविषयकान्तःप्रवाहेन सह गुणवत्ताविषयस्य शैक्षणिकप्रक्रियायाः च अपेक्षा विद्यते अतः सर्वेपि अध्यापकशिक्षाकार्यक्रमाः समग्रबहुविषयसंस्थासु आयोजिताः स्युः। एतदर्थं बहुविषयकविश्वविद्यालयानां सार्वजनिकविश्वविद्यालयानां बहुविषयकमहाविद्यालयानां च लक्ष्यं स्यात् यत्ते उच्चकोटिकशिक्षाविभागस्य स्थापनां विकासं च कुर्युः। शिक्षायाम् आधुनिकसंशोधननिर्वर्तनेन सह मनोविज्ञानम्, दर्शनशास्त्रम्, समाजशास्त्रम्, तान्त्रिकविज्ञानम्, भारतीयभाषाः, कला, संगीतम्, इतिहासः साहित्यम्, विज्ञानम्, गणितम्, इत्याद्यन्यविषयेषु संबद्धविभागसहयोगेन भाविशिक्षकाणां शिक्षणार्थं शिक्षाशास्त्र (बी.एड) कार्यक्रमस्य संचालनं करिष्यन्ति। अनेन सह 2030 यावत् सर्वासां एककशिक्षकशिक्षासंस्थानां बहुविषयकशिक्षा-संस्थारूपेण परिवर्तनस्य अपेक्षा भवति यतोहि ताः संस्थाः अपि चतुर्वर्षीयसमग्रशिक्षकप्रशिक्षणकार्यक्रमस्य संचालनं कुर्युः।
- 2030 यावत् बहुविषयकशिक्षासंस्थाभिः प्रदीयमानः चतुर्वर्षीय समेकीकृत- शिक्षाशास्त्र-(बी.एड) पाठ्यक्रमः विद्यालयशिक्षकाणां कृते न्यनोपाधियोग्यता भविष्यति। इयं चतुर्वर्णीयशिक्षाशास्त्रशिक्षा भाषा, इतिहासः, संगीतम्, गणितम्, संगणकविज्ञानम्. रसायन-विज्ञानम्, अर्थशास्त्रम्, इत्यादिषु विशेषविषयेषु समग्रद्विमुख-स्नातकपदवी भवति। आधुनिकशिक्षाशास्त्रशिक्षणेन सह शिक्षक-शिक्षायां समाजशास्त्रम्, इतिहासः, विज्ञानम्, मनोविज्ञानम्, प्रारम्भिकबाल्यावस्थाशिक्षा, मूलभूतसाक्षरता, संख्याज्ञानम्, भारतीयज्ञानं तन्मूल्यानि, लोकाचारः, कला, परम्परा इत्याद्यनेके विषयाः अन्तर्भवन्ति चतुर्वर्षीयैकीकृतशिक्षाशास्त्र (बी.एड) संचाल्यमाना प्रत्येकम् उच्चशिक्षासंस्था यदि एकस्मिन् विषयविशेषे पूर्वमेव स्नातकपदवीं प्राप्ताः उत्तमश्छात्राः अग्रेपि शिक्षणम् अनुवर्तयितुम् इच्छन्ति चेत् तादृशेभ्यः तस्मिन् परिसरे द्विवर्षीयशिक्षाशास्त्र (बी.एड) कार्यक्रमस्य प्रारूपं निर्माय संचालयितुं शक्नोति। यदि विद्यार्थीनः कस्मिंश्चिदपि विषयविशेषे चतुर्वर्षीयस्नातकपदवीं प्राप्ताः चेत् तादृशेभ्यः एकवर्षस्य शिक्षाशास्त्र (बी.एड) कार्यक्रमस्य संचालनमपि कर्तुं शक्नोति।

- चतुर्वर्षीय-द्विवर्षीय-एकवर्षीय शिक्षाशास्त्र (बी.एड) कार्यक्रमम् आकर्षयितुं श्रेष्ठविद्यार्थिभ्यः छात्रवृत्तिव्यवस्थापि कल्प्यते।
- अध्यापकशिक्षाकार्यक्रमं संचाल्यमानाभिः उच्चशिक्षासंस्थाभिः शिक्षायां तत्सम्बद्धविषयेषु विषयविशेषज्ञानाम् उपलब्धिः निश्चीयते । प्रत्येकम् उच्चशिक्षासंस्था संभूयकार्यं कर्तुं सार्वजनिक-सार्वजनिकेतरविद्यालयानां तत्परिसराणां च संपर्कजालो भवति। तत्र भाविशिक्षकाः सामुदायिकसेवा, वयस्क व्यावसायिकशिक्षा इत्यादिषु भागग्रहणेन सह शिक्षणकार्यमपि संपादयन्ति ।
- शिक्षकशिक्षार्थं समानमानकस्य स्थापनाय पूर्वसेवाशिक्षक-सिद्धताकार्यक्रमे प्रवेशः राष्टियपरीक्षणसंस्थया आयोजितेन उपयुक्त-विषययोग्यतापरीक्षणेन भवति तथा देशस्य 'भाषा सांस्कृतिक-वैविध्यमित्येतत् सर्वं मनसि निधाय मानकीकरणं भवति ।
- शिक्षाविभागस्य संकायसदस्यानां विवरणं वैविध्यं स्यात् किन्तु शिक्षणम्/ क्षेत्रम्/शोधानुभवः अनर्थ्यं विद्यते। साक्षात् विद्यालय-शिक्षासंबद्धे सामाजिकविज्ञानक्षेत्रे तद्यथा मनोविज्ञानम्, बालविकासः, भाषाविज्ञानम्, समाजशास्त्रम्, दर्शनम्, अर्थशास्त्रम्, राजनीतिविज्ञानम् इत्यादिषु तथा विज्ञानशिक्षा, गणितशिक्षा, सामाजिकविज्ञानशिक्षा, भाषाशिक्षा, इत्यादिकार्यक्रमैः सह सम्बद्धविषयेषु प्रशिक्षणं प्राप्तानां संकायसदस्यानां कृते शिक्षकशिक्षासंस्थासु समाकर्षणं नियोजनं च क्रियते। येन शिक्षकाणां बहुविषयकशिक्षायाः परिकल्पनाविकसस्य कृते बलं प्रदातुं शक्येत ।
- महाविद्यालयानां विश्वविद्यालयानां च शिक्षकाणां कृते सेवारत-सततव्यावसायिकविकासप्रशिक्षणं विद्यमानसांस्थिव्यवस्था च प्राचल्यमानोपक्रमेण अनुवर्तते। किन्तु गुणवत्ताशिक्षार्थम् अपेक्षितानां समृद्धशिक्षणाधिगमप्रक्रियाणाम् अपेक्षाणां च पूरणार्थम् एतेषां दार्ज्यसंपादनं विस्तारश्च भवति। शिक्षकाणां सद्यस्क (आनलाईन) प्रशिक्षणार्थं स्वयम्/दीक्षा इत्यदि-तन्त्रज्ञानस्य आलम्बनम् (प्लाटफार्म) उपयोक्तुं प्रोत्साह्यते। येन मानकीकृत-प्रशिक्षणकार्यक्रमं न्यूनसमये अधिकशिक्षकेभ्यः प्रापयितुं शक्यते।
- मार्गदर्शनार्थं राष्ट्रियविनियोगस्य (मिशन) स्थापना करिष्यते। तत्र अधिकसंख्यया वरिष्ठानां/सेवानिवृत्तानाम् उत्तमसंकायसदस्यानां समावेशनं क्रियते। तत्र भारतीयभाषाणां पाठने समर्थाः तथा विश्वविद्यालयानां महाविद्यालयानां शिक्षकाणां कृते अल्पकाले दीर्घकाले च मार्गदर्शनं व्यावसायिकसहायं कर्तुं समर्थाश्च अन्तर्भवन्ति ।

**अध्यापकपदं सुशोभामानाय कृताः परामर्शाः**

वास्तवरूपेण शिक्षकाः एवं बालकानां भविष्यं निरूपयन्ति । अतः ते अस्माकं राष्ट्रस्य भविष्यमपि निर्मान्ति। अतः एतेषाम् उदात्तयोग-दानस्य कारणेनैव भारतस्य समाजे शिक्षकाः अधिकसम्मानित-सदस्याः सन्ति । अतः सर्वोत्तमः विद्वान् एव शिक्षकः भवितुम् अर्हति। विद्यार्थिनां कृते ज्ञानस्य कौशल्यस्य नैतिकमौल्यस्य च सर्वोत्तमतया संक्रमणार्थं समाजः शिक्षकाणां कृते गुरूणां कृते अपेक्षितानि सर्वाणि संसाधनानि प्रददाति। अध्यापकाशिक्षायाः गुणवत्ता, वृत्तिः, पदानि, सेवानियमाः, शिक्षकाणाम् आधिकारिकी स्थितिः च यथा स्यात् तथा नास्ति। तेन शिक्षकाः गुणवत्ताम् अपेक्षितमापदण्डं च प्राप्सुम् असफलाः संजाताः सन्ति । शिक्षणव्यवसाये उत्तमजनानां प्रवेशार्थं प्रेरयितुं शिक्षकाणां कृते सम्मानादरभावं पुनरुज्जीवयेत्। अस्माकं बालकानां देशस्य च कृते उत्तमभविष्यं विनिश्चेतुं शिक्षकाणां कृते प्रेरणा सबलीकरणं च अपेक्षितम् अस्ति।

- शिक्षक्रपात्रतापरीक्षा (टीईटी) सामग्रीमध्ये तथा शिक्षाशास्त्रे परीक्षणसामग्रीविकासार्थ प्रयासो 'भविष्यति । विद्यालयशिक्षायाः सर्वेषु स्तरेषु (मूलाधारः, प्रारम्भिकम्, मध्यमम्, माध्यमिकम्) शिक्षकैः सह शिक्षकपात्रतापरीक्षायाः अपि विस्तरणं भविष्यति । विषय- शिक्षकाणां नियुक्तिप्रक्रियायां सम्बद्धविषयेषु -टीईटी परीक्षायाम् अथवा एनटीएपरीक्षायां प्राप्ताङ्कानामपि योजन भविष्यति। शिक्षणं प्रति उत्साहपरीक्षणार्थं शिक्षकनियुक्ति-प्रक्रियायाः साक्षात्कारः अथवा विद्यालये पाठनप्रदर्शनम् अभिन्नमङ्गं भविष्यति। एतेषां साक्षात्काराणामुपयोगः स्थानीय-भाषायां शिक्षणे नैजतायाः तथा दक्षतायाः आकलनकरणार्थं भविष्यति। येन प्रत्येकं विद्यालये अथवा विद्यालयसंकुलमध्ये केचन अध्यापकाः तादृशाः अपि भवेयुः ये स्थानीयभाषायां तथा छात्राणां व्यवहारभाषायां वार्तालापं कर्तुं जानीयुः। असर्वकारीयविद्याल-येष्वपि शिक्षकाणां योग्यता सर्वकारीयविद्यालयवद् भवेत्। तत्रापि नियुक्तिप्रक्रियायां शिक्षकपात्रतापरीक्षा, विद्यालये पाठनप्रदर्शनं च अवश्यं भविष्यतः।
- शिक्षकाः पाठ्यक्रमे तथा शिक्षणप्रक्रियायां स्वतन्त्राः भवेयुः येन ते विद्यार्थिनां कृते कक्षायां प्रभावरूपेण पाठयितुं प्रभविष्यन्ति। शिक्षकाः विद्यार्थिनां सर्वाङ्गीणविकासाय सामाजिक-भावनात्मक-पक्षेष्वपि अधिकं बलं दद्युः। शिक्षकाणां कृते तादृशशैक्षणिकविधिं स्वीकर्तुं प्रोत्साहनमपि भविष्यति। येन कक्षायां विद्यार्थिनाम् अवबोधने वृद्धिः भवेत् ।
- शिक्षकाः पाठ्यक्रमे तथा शिक्षणप्रक्रियायां स्वतन्त्राः भवेयुः येन ते विद्यार्थिनां कृते कक्षायां प्रभावरूपेण पाठयितुं प्रभविष्यन्ति। शिक्षकाः विद्यार्थिनां सर्वाङ्गीणविकासाय सामाजिक-भावनात्मकपक्षेष्वपि अधिकं बलं दद्युः। शिक्षकाणां कृते तादृशशैक्षणिकविधिं स्वीकर्तुं प्रोत्साहनमपि भविष्यति। येन कक्षायां विद्यार्थिनाम् अवबोधने वृद्धिः भवेत्।
- शिक्षकेभ्यः उच्चगुणवत्तायाः सामर्थ्या सह शिक्षणशास्त्रे प्रशिक्षणस्यापि आवश्यकता भविष्यति। अध्यापकशिक्षायाः अपि

शनैः शनैः 2030 वर्ष यावत् बहुविषयकविद्यालयेषु विश्वविद्यालयेषु च अन्तर्भावः क्रियते।

- सतत-व्यावसायिक-विकासः (सीपीडी): शिक्षकाणां कृते शिक्षण-विधौ समुन्नत्यर्थम् आधुनिकविचारं नवाचारं च स्वीकर्तुम् अवसरो भविष्यति। एतेभ्यः स्थानीय-क्षेत्रीय-राज्य-राष्ट्रिय-अन्ताराष्ट्रिया-कार्यशालाभिः सह अन्तर्जालमाध्यमेन (आनलाइन) शिक्षक-विकाससमानकरूपेण नैके उपायाः करिष्यन्ते। विशेषतः अन्तर्जालमाध्यमेन आधारशिलायाः विकासो भविष्यति येन शिक्षकाणां सर्वोत्तमविचारेषु- प्रथासु च सहभागित्वं स्यात्। शिक्षकाः स्वव्यावसायिकविकासाय स्वेच्छया प्रतिवर्ष पञ्चाशत्होरापरिमितं कालम् अत्र सीपीडीकार्यक्रमे व्यतीतं शक्नुयुः। सीपीडीकार्यक्रमेषु विशेषतः साक्षरतायाः संख्यात्मकज्ञानस्य नवीनतमं शिक्षणशास्त्रम्, अधिगमपरिणामस्य रचनात्मकम् अनुकूलाकलनं च योग्यताधारिताधिगमम्, सम्बन्धितशिक्षणशास्त्रम् यथा - अनुभवात्मकं शिक्षणम् समावेशिकला, समावेशिक्रीडा, कथाधारितदृष्टिः इत्यादीनाम् क्रमबद्धरूपेण प्रशिक्षणं भविष्यति।
- आजीविकाप्रबन्धनं प्रगतिश्च - (सीएमपी) :ये अध्यापकाः उत्कृष्टं प्रदर्शनं कुर्वन्ति तेषां शिक्षकाणाम् चयनं कृत्वा तेषां पदोन्नतिः वेतनवृद्धिश्च कर्तव्या। येन सर्वेऽपि शिक्षकाः स्वकार्य कर्तुं प्रोत्साहिताः भवेयुः। अतः सशक्त- योग्यतानुगुणं कार्यकालस्य, पदोन्नतिव्यवस्थायाः, तथा वेतनव्यवस्थायाश्च निर्माणं करिष्यते। यत्र शिक्षकाणाम् प्रत्येकं स्तरः बहुस्तरीयो भविष्यति। येन योग्यतमशिक्षकाणाम् प्रोत्साहनं तथा विशिष्टसम्माननं भविष्यति। शिक्षकाणां प्रदर्शनस्य समुचितरूपेण आकलनार्थं राज्य/केन्द्र-शासितप्रदेशानां सर्वकारेण मल्टीपल पैरामीटर्स व्यवस्था भविष्यति। यत्र सहकर्मिभिः कृतायाः समीक्षायाः, उपस्थितेः, समर्पणभावनायाः, सीपीडीकार्यक्रमे व्यतीतस्य कालस्य, विद्यालये समुदाये वा कृतायाः सेवायाः वा, अथवा एनपीएसटीमध्ये कृतायाः सेवायाः आधारं स्वीकृत्य चयनं भविष्यति। अत्र नीती कार्यसंपादनकाले इत्यंशस्य आशयः- प्रदर्शनयोगदानयोः आकलनं कृत्वा स्थायिवृत्तिरूपेण संबद्धो विद्यते। वृत्तिजीवनानुपदिक- पदस्य आशयः स्थायिवृत्तितः प्राक् पूर्वपरिवीक्षाकालेन अस्ति।

**उपसंहारः** अतः इयं शिक्षानीतिः भारते अध्यापकशिक्षायाः गुणवत्तां तथा तत्परिमाणं परिवर्तयितुं व्यापकदृष्टिं प्रसारयति। शिक्षकाणां कृते राष्ट्रियव्यावसायिकमानकानि अध्यापकशिक्षायाः गुणवत्तां सुनिश्चित्य निर्मिताः सन्ति तथा च एनईपी २०२० इत्यस्य लक्ष्यं सर्वेषां अधिगन्तृणाम् कृते उच्चतमगुणवत्तायुक्तशिक्षायाः समानरूपेण आवंटनं कर्तुं निर्धारिताः सन्ति। यथा शिक्षणस्यान्वेषणं अन्वेषणाधारिता शैली, वैज्ञानिकपद्धतिः, तार्किकचिन्तनस्य प्राधान्यं, उच्चशिक्षासंस्थासु समग्रशिक्षायाः बहुविषयक-वातावरणस्य निर्माणम् च। एनईपी २०२० इत्यनेन इदमपि अनुशंसितं यत् शिक्षकेभ्यः आत्मपरिवर्तनस्य निरन्तरं अवसराः प्राप्स्यति तथा च स्वव्यापारेषु नवाचाराय नवीनतां उन्नतिं च ज्ञातुं शक्नुवन्ति। विशेषविषयप्रशिक्षणार्थम् अन्ताराष्ट्रियस्तरेषु नैके शिक्षाविधयः भवन्ति । एनसीईआरटीसंस्था विभिन्नविषयेषु शिक्षणस्य विविधविधीनां अध्ययनं, शोधप्रलेखनं च करिष्यति। तेषु उपयुक्तानां शिक्षाविधीनां भारतेऽपि स्वीकारो भविष्यति। उपर्युक्ताः सर्वे बिन्दवः अध्यापकशिक्षां दृढीकर्तुं महत्वपूर्णास्सन्ति। येन राष्ट्रे गुणवत्तायुक्ता अध्यापकशिक्षा समुचितरुपेण विकसितम् उत्प्रेरितञ्च स्यात्।

**सन्धर्भग्रन्थाः**


- मिश्र,भास्कर, “अध्यापक शिक्षा में उदीयमान प्रवृत्तियाँ” 2014,श्री लाल बहादुर शास्त्री राष्ट्रिय विद्यापीठ(मानित विश्वविद्यालय) दिल्ली
- जोशी, प्रह्लाद, “अध्यापकशिक्षा”, 2007, राष्ट्रियसंस्कृतविद्या-पीठम् (मानित विश्वविद्यालय) तिरूपति
- शर्मा, अमितेश, अध्यापक शिक्षा के मूल तत्व, ठाकुर पब्लिकेशन प्राइवेट लिमिटेड, लखनऊ

**Journal**

- Thakral, Pradip. 2015. Role of ICT in professional development of teacher. New Delhi publisher. Learning community: 6(1), PP 127-133.
- Rout, J. priya. 2017. Quality important is teacher education. International education and research journal. Vol-3, No-7, E-ISSN No- 2454-9916.
- Dixit, Mohit. 2014. Teacher education in India-problems and suggestion. International journal of research (IJR). Vol-1, Issue-4, ISSN 2348-6848.
- Himmat, Darshit. 2017. Challenges and remedy of teacher education. Global science research journal, Vol. 5(1), PP. 077-081, ISSN: 2465-7212.
- Eraut, Michael. 1977. Strategies for promoting teacher development. Journal of in-service education. 4:1-2, 10-12, ISSN: 0305-7631.
- Mondal, D.K., Nag, Subir and Dasgupta, R.S. 2014-2015. Teaching as a profession. Kolkata, Rita publication, ISBN: 978-93-82229-90-2.